# संस्कृतवार्ता:

दिनाङ्क : 19/02/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

<u>आदौ मुख्यवार्ताः</u>

- राष्ट्रियराजधान्याः दिल्ल्याः नवीन-मुख्यमन्त्रिणः नाम सुनिश्चेतुम् अद्य सायंकाले भाजपेतिदलं विधायकदलस्य एकां सभाम् आयोजयिष्यति। विधायकदलस्य नेतु: चयनाय दलनेतारौ रविशङ्करप्रसादः ओमप्रकाश धनखड-इत्येतौ केन्द्रीय-पर्यवेक्षकत्वेन नियुक्तौ।
- केन्द्रेण आपद्भिः प्रभावितेभ्यः पञ्चराज्येभ्यः चतु:पञ्चाशदधिक-पञ्चदश-शत-कोटि-रूप्यकाणाम् अन्यायै केन्द्रीय-सहायतायै स्वीकृतिः प्रदत्ता ।
- ग्रामीण-विकास-मन्त्री शिवराज-सिंह-चौहानः प्रोक्तवान् यत् प्रशासनेन ग्रामीण-नागरिकाणां जीवनम् अधिकं सौख्ययुतं निर्मातुं अनेकाः क्रान्तिकारिण्य: योजनाः समारब्धाः ।
- श्रीज्ञानेश-कुमार: अद्य नवीनस्य मुख्य-निर्वाचनायुक्तस्य रूपेण कार्यभारं सम्भालितवान् ।
- क्रिकेट्-क्रीडायाम्, आई.सी. सी. चैम्पियन्स ट्रॉफी इति स्पर्धाया: नवमं संस्करणं कराचीनगरे आरब्धम् । प्रारम्भिकं द्वन्द्वं पाकिस्तान-न्यूजीलैण्ड -दलयोर्मध्ये प्रचलति ।

---

<u>भाजपेतिदलोपवेशनम्</u>

राष्ट्रियराजधान्याः दिल्ल्याः नवीन-मुख्यमन्त्रिणः नाम सुनिश्चेतुम् अद्य सायंकाले भाजपेतिदलं विधायकदलस्य एकां सभाम् आयोजयिष्यति। विधायकदलस्य नेतु: चयनाय दलनेतारौ रविशङ्करप्रसादः ओमप्रकाश धनखड-इत्येतौ केन्द्रीय-पर्यवेक्षकत्वेन नियुक्तौ। नवीनाय मुख्यमन्त्रिणे शपथग्रहणसमारोहः श्वः प्रातः राजधान्याः रामलीला-क्रीडाङ्गणे आयोजयिष्यते ।

--------------------------------------------------------

केन्दर्प्रशासनम् खाद्यानम्

गृहमन्त्रिणः अमितशाहस्य आध्यक्ष्ये एकया उच्चस्तरीयसमित्या विगतवर्षे सहसैव समागताभिः आपद्भिः प्रभावितेभ्यः पञ्चराज्येभ्यः चतु:पञ्चाशदधिक-पञ्चदश-शत-कोटि-रूप्यकाणाम् अन्यायै केन्द्रीय सहायतायै स्वीकृतिः प्रदत्ता । अयं राशिः राष्ट्रियापत्मोचन-कोषात् प्रसृतः । गृहमन्त्रालयानुसारि आन्ध्रप्रदेशाय अष्टाधिक-षड्शत-कोटिरूप्यकाणां नागालैण्डराज्याय सप्तत्यधिकैकशत-कोटिरूप्यकाणाम् ओडिशाराज्याय पञ्चपञ्चाशदधिकद्विशत-कोटिरूप्यकाणां तेलङ्गानाराज्याय एकत्रिंशदधिक-द्विशत-कोटिरूप्यकाणां त्रिपुराराज्याय च अष्टाशीत्यधिक-द्विशत-कोटिरूप्यकाणां राशिः अनुमोदितः । गृहमन्त्रालयेन सूचितं यत् अयं हि साहाय्यराशिः राज्यापात्मोचन-कोषस्य अन्तर्गतं केन्द्रद्वारा राज्येभ्यः प्रदत्तधनराशेः अतिरिक्तो वर्तते । चतुर्विंशत्यधिक- पञ्चविंशत्यधि-द्विसहस्र तमवर्षयोः अवधौ केन्द्रप्रशासनेन राज्यापात्मोचन-कोषान्तर्गतं सप्तविंशति- राज्येभ्यः द्वाविंशत्यधिक-त्रिशतोत्तर-अष्टादशसहस्र-कोटि-रूप्यकाणि अथ च, राष्ट्रियापात्मोचनकोषात् अष्टादशराज्येभ्यः अष्टाधिक-अष्टशतोत्तर-चतुः सहस्र-कोटि-रूप्यकाणि आवण्टितानि ।

--------------------------------------------------------

शिवराजः – ग्रामीणार्थव्यवस्था

ग्रामीण-विकास-मन्त्री शिवराज-सिंह-चौहानः प्रोक्तवान् यत् प्रशासनेन ग्रामीण-नागरिकाणां जीवनम् अधिकं सौख्ययुतं निर्मातुं अनेकाः क्रान्तिकारिण्य: योजनाः समारब्धाः । अनेनोक्तं एताः योजनाः देशस्य अर्थव्यवस्थायै नवीनां गतिं प्रदत्तवत्यः । श्रीसिंहः नवदिल्ल्याम् अफ्रीकी-एशियाई-ग्रामीण-विकास- सङ्घटनस्य -ए. ए. आर. डी. ओ. इत्येतस्य एकस्मिन् कार्यक्रमे उक्तवान् यत् भारतम् ए. ए. आर. डी. ओ. इत्येनं स्वकीयेन समर्थनेन सह ग्रामीण समुदायं सशक्तं निर्मास्यति।

अत्रावधौ श्रीसिंहेन महात्मागांधी-राष्ट्रिय-ग्रामीण-रोजगार-गारण्टी-अधिनियमः प्रधानमन्त्री-ग्रामीण-सड़क-योजना एक पेड़ मां के नाम अभियानं लखपतिदीदी सदृशाः योजना: उल्लिखिता:। उक्तं च यत् पूर्वं भारतं भोजनाय अन्येषु देशेषु निर्भरमासीत् परञ्च अद्य अयं देश: न केवलं खाद्यान्नोत्पादने आत्मनिर्भरोऽस्तीति अपितु अन्येभ्यः देशेभ्या साहाय्यमपि करोतीति।

-----------------------------------------------------

ज्ञानेश कुमार:

श्रीज्ञानेश कुमार: अद्य नवदिल्लीस्थिते निर्वाचनसदने नवीनस्य मुख्य-निर्वाचना-युक्तस्य रूपेण कार्यभारं सम्भालितवान् । असौ श्रीराजीवकुमारस्य स्थानम् अवाप्नोत् यो हि ह्य: स्वकार्यकालम् सम्पूरितवान् । कार्यभारस्य ग्रहणानन्तरं स्वकीये सन्देशे श्रीकुमारः अकथयत् यत् राष्टर्निर्माणाय प्रथमं चरणं मतदानं वर्तते इति।

मुख्य-निर्वाचनायुक्तस्य रूपेण पदोन्नत्याः प्राक् श्री कुमारः विगतवर्षे मार्चमासस्य पञ्चदशदिनाङ्कात् निर्वाचनायुक्तत्वेन कार्यरतः आसीत्।

-----------------------------------------------------

महाकुम्भ

सम्प्रति श्रूयन्तां महाकुम्भवार्ता:

*उत्तरप्रदेशस्य प्रयागराजे प्रचल्यमाने महाकुम्भमेलके लक्षशः श्रद्धालवः निरन्तरं समागच्छन्ति तथा च अद्य मध्याह्ने द्वादशवादनं यावत् पञ्चषष्टि- लक्षाधिक - श्रद्धालवः पवित्रसङ्गमे स्नानम् अकुर्वन् । प्रयागराजे सङ्गमतले स्थितं लेटे इत्याख्यं हनुमानमन्दिरम् अत्यन्तं लोकप्रियं वर्तते । कुम्भावसरे अस्मिन् मन्दिरे प्रतिदिनं भक्तानां बृहद्-सम्मर्द दृश्यते इतः प्राक् जनसम्मर्द: केवलं मङ्गलवासरे शनिवासरे च पारम्परिक रूपेण भवति स्म । धार्मिक मान्यहतानुसारेण-सङ्गमे स्नानं कृत्वा मन्दिरस्य-यात्रा बहुफलदायिनी भवति। एवं कथ्यते यत् यदा भगवान् हनुमान् लङ्कां जित्वा प्रत्यागतः आसीत् तदा सः क्लान्तो जातः । मातुः सीतायाः अनुरोधेन भगवान् हनुमान् सङ्गमतरे शयनं कृतवान, तदनन्तरं लेटे इत्याख्यस्य-हनुमान्मन्दिरस्य निर्माणं-सञ्जातम्। आकाशवाण्या सह वार्ताविधौ पश्चिमबगालस्य एका श्रद्धालु: स्वमात्रा सह त्रिवेणीसङ्गमे स्नानं कृत्वा मन्दिरस्य स्वयात्रायाः अनुभवं प्रकटितवती ।*

-------------------------------------------------------

प्रधानमन्त्रि – शिवाजीमहाराज:

महान् – मराठायोद्धा: छत्रपति - शिवाजी - महाराज्ञः पञ्चनवत्यधिक - त्रिशततमी जयन्ती अद्य आमान्यते । त्रिंशदधिक- षोडशशततमे वर्षे अस्मिन् एव दिने महाराष्ट्रस्य पुणे - जनपदस्य शिवनेरी- दुर्गे जनितः छत्रपति: शिवाजी मराठासाम्राज्यस्य-स्थापनां कृतवान् आसीत् तथा च मुगलशासनाय समाह्वानानि दत्तवान् आसीत्। प्रगतिशीलनेतृत्वाय, सैन्यकौशलाय, शौर्याय स्वराज्यस्य प्रयासाय च छत्रपति - शिवाजी महाराज्ञः व्यापकरूपेण प्रशंसा भवति ।

प्रधानमन्त्रिणा नरेन्दर्मोदिना छत्रपति शिवाजी-वर्याय श्रद्धाञ्जलि: समर्पितः । एकस्मिन् सामाजिक सञ्चार पटले श्रीमोदी अलिखत् यत् छत्रपति: शिवाजी महाराज: नागरिकान् आत्मनिर्भराय समृद्धाय च राष्ट्राय प्रेरितं करोति ।

-------------------------------------------------------

मनसुखमाण्डविया:

केन्द्रिययुवकार्यक्रम-खेलमन्त्री मनसुख-माण्डवियाः अद्य छत्रपति-शिवाजी-महाराज्ञः जयन्त्यवसरे पुणे-नगरे पदयात्रायां सम्मिलितो जातः। अस्मिन् अवसरे श्रीमाण्डवियाः उक्तवान् यत् यादृशः छत्रपतिः शिवाजी महाराजः आदर्शशासनेन हिन्दवीस्वराज्यस्य स्थापनां कृतवान्, तादृशः एव नरेन्द्रमोदी-प्रशासनम् अपि तस्य सिद्धान्तैः प्रेरितं भूत्वा विकसितभारतस्य निर्माणाय कार्यं कुर्वदस्ति।

-------------------------------------------------------

विदेशमंत्री - दक्षिण-आफ्रिका

विदेशमंत्री डा. एस्. जयशङ्करः दक्षिण-आफ्रिकादेशस्य अन्ताराष्ट्रिय-सम्बन्ध-सहकार-मन्त्रिणः रोनाल्ड-लामोला-इत्यस्य आमन्त्रणेन जोहान्स्बर्ग्-नगरे जी-20 इति विदेश-मन्त्रिणां सभायां भागं ग्रहीतुं श्वः दक्षिण-आफ्रिकादेशस्य द्विदिवसीययात्रायाम् गमिष्यति। विदेशमन्त्रालयः अवदत् यत्, विदेशमन्त्रिमण्डले डा. जयशङ्करस्य सहभागित्वेन जी-20 देशैः सह भारतस्य

सम्पर्कः सुदृढः भविष्यति, अस्मिन् महत्त्वपूर्णे मञ्चे ग्लोबल्-सौथ् इत्यस्य ध्वनि: अपि सुदृढः भविष्यति। विदेश-मंत्री विदेश-मन्त्रिणां सभायाः पार्श्वे कतिपयानि द्वैपाक्षिक-सम्मेलनानि करिष्यन्ति इति अपेक्षा अस्ति।

---

क्रिकेट्

क्रिकेट्-क्रीडायाम्, आई.सी. सी. चैम्पियन्स ट्रॉफी इति स्पर्धाया: नवमं संस्करणं कराचीनगरे आरब्धम् । प्रारम्भिकं द्वन्द्वं पाकिस्तान-न्यूजीलैण्ड -दलयोर्मध्ये प्रचलति ।

।। इति वार्ता:।।